# शिक्षाशास्त्री

**विशेषफलितांशाः (Specific Outcomes)**

- छात्राध्यापकाः बाल्यावस्थातः प्रौढावस्थापर्यन्तं मानवानां विकासः, बालानां संवेगः, शिक्षणाधिगमप्रक्रियायां मनोविज्ञानस्य भूमिका, शिक्षणाधिगमपद्धतिः, ज्ञानविज्ञानाधारितशिक्षा, व्यवसाये नैतिकता, समसामयिकसमस्यापरिहारोपायः इत्यादिकम् अवगच्छेयुः।
- छात्राध्यापकाः शिक्षायाः विविधदार्शनिकविचारान् अवगत्य शैक्षिकसिद्धान्तः, अनुशासनम्, शिक्षकः, छात्रः, गुरुशिष्यसम्बन्धः विद्यालयः, पाठ्यक्रमः, शिक्षणविधिः इत्यादिकं जानीयुः।
- छात्राध्यापकाः राष्ट्रियपाठ्यक्रमरूपरेखा, शिक्षानीतिः, भारतीयशिक्षेतिहासः, पाठ्यक्रमनिर्माणं, पाठ्यसहगामिक्रियाणां चयानम् इत्यादिभ्यः परिचिताः भवेयुः।
- छात्राध्यापकाः माध्यमानस्य, मध्यमाङ्कस्य, प्रामाणिकविचलनस्य, सहसम्बन्धस्य च गणनं कथं करणीयम् इति अभिजानीयुः।
- छात्राध्यापकाः मापनमूल्याङ्कायोः विविधतन्त्राणां ज्ञानं प्राप्नुयुः।
- छात्राध्यापकाः शिक्षणाधिगमप्रक्रियायां सहायकोपकरणानां उपयोगस्य ज्ञानम् आप्नुयुः।
- छात्राध्यापकाः विद्यालयप्रबन्धनं प्रशासनं च जानीयुः ।
- छात्राध्यापकाः व्यावसायिकक्षमतां सम्पादयेयुः ।
- छात्राध्यापकाः कक्ष्यायां विविधावश्यकताः, समावेशात्मकक्ष्यायां विविधावश्यकताधिगन्तृणां बालानां बोधनं, निम्नाधिगन्तृणां बालानां कृते मार्गदर्शनं, परामर्शः, मानवाधिकारार्थं महिलासशक्तीकरणार्थं च शिक्षा, शिक्षणोपकरणानां निर्माणम् इत्यादिकम् अवबुध्येरन्।
- छात्राध्यापकाः विद्यालयेषु शिक्षणाभ्यासं कृत्वा पाठयोजनानिर्मणं, सरलमानकसंस्कृतभाषया पाठनं, परियोजनानिर्माणम्, कक्ष्यायामध्यापकस्य व्यवहारः, अन्यैः अध्यापकैः सह कथं वर्तनीयम् इत्यादिकम् अवगच्छेयुः।
- छात्राध्यापकाः शिक्षाशास्त्रे शास्त्रान्तरे च सिद्धान्तेषु साम्यवैषम्यादिकम् अवगन्तुं समर्थाः जायेरन्।
- छात्राध्यापकाः शास्त्राणाम् अध्यापने सूचनासम्प्रेषणप्रविधीनाम् उपयोगं कर्तुं पारयेयुः।

# शिक्षाचार्यः

विशेषफलितांशाः **(Specific Outcomes)**

- प्रगतशिक्षणकौशलस्य विकसनम्।
- उच्चशिक्षायां सूचनासम्प्रेषणप्रोद्योगिक्याधारितशिक्षणानुप्रयोगः।
- शिक्षणे अनुसन्धानोपागमवृत्तेरभिवर्धनम्।
- अनुसन्धानदृशा संस्कृतज्ञाननिधेः समसामयिकीकरणम्।
- छात्राध्यापकाः मापनमूल्याङ्कायोः विविधतन्त्राणां ज्ञानं प्राप्नुयुः।
- छात्राध्यापकाः विद्यालयप्रबन्धनं प्रशासनं च जानीयुः ।
- छात्राध्यापकाः व्यावसायिकक्षमतां सम्पादयेयुः ।
- छात्राध्यापकाः कक्ष्यायां विविधावश्यकताः, समावेशात्मकक्ष्यायां विविधावश्यकताधिगन्तृणां बालानां बोधनं, निम्नाधिगन्तृणां बालानां कृते मार्गदर्शनं इत्यादिकम् अवबुध्येरन्।

# विद्यावारिधिः

विशेषफिलतांशाः **(Specific Outcomes)**

- समाजोपयोगि-अनुसन्धानकार्यसपादनार्थं शोधाभिवृत्तेः विकसनम्।
- पाडुलिपिसम्पादनाय विविधपाठसमीक्षणस्य च कौशलसम्पादनम।
- प्रशिक्षणमहाविद्यालयेषु विश्वविद्यालयेषु च अध्यापनं कर्तुम् अर्हतोत्पादनम्।
- शैक्षिकानुसन्धानकौशलानां सम्पादनम्।
- विविधविषयाध्ययनेन नैतिक-सामाजिक-सांकृतिक-चारित्यिक-व्यावहारिक-दायित्वबोधयुक्तानाम् आदर्शनागरिकाणां निर्मितिः।
- लेखनकौशलेन पाठ्यसामग्रीप्रदानार्थं सामर्थ्योत्पादनम्।